**कोलि** स्त्री कुल–इन्। बदर्य्याम् पक्षे वा ङीप् अमरः

**कोलिसर्पः** पु० सगरेण म्लेच्छतां प्रापिते क्षत्रियभेदे। उदा० केरलशब्दे हरिवं० वाक्यमुक्तम् "कोलिसर्पा माहिषकास्तास्ताः क्षत्रियजातयः। वृषलत्वं परिगता ब्राह्मणानामदर्शनात्" भा० अनु० ६६ अ० [राजा अण् कौलूत तन्नृपे

**को(कौ)लूत** पु० कुलूतशब्दार्थे दृ० स० पाठान्तरम्। तस्य

**कोल्या** स्त्री कोलमर्हति यत्। पिप्पल्यां रत्नमा०

**कोल्ल** पु० भारतवर्षस्थे पर्वतभेदे "भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः" इत्युपक्रमे "ऋषभः कूटकः कोल्लः सह्यगिरिः" इत्यादि भाग० ५।१९।१० उक्तम्। स च गिरिः वृ० सं० कूर्म्मविभागे "अथ दक्षिणेन लङ्का" इत्युक्रमे "कर्णाटकमहाटविचित्रकूटनासिककोल्लगिरिचोलाः" इति दक्षिणस्यामुक्तः। कोल्लगिर्य्यादयोऽप्यत्र। तत्र भवः तस्य राजा वा वा० ढक्। कौल्लगिरेय तत्रभवे तन्नृपे च। "अर्च्चितः प्रययौ भूयो दक्षिणं सलिलार्णवम्। तत्रापि द्राविडैरान्ध्रै रौद्रैर्माहिषकैरपि। तथा कौल्लगिरेयैश्च युद्धमासीत् किरीटिनः" भा० आश्व० ८३अ०।

**कोविद** पु० कुङ् शब्दे–विच् कौर्वेदस्तं वेत्ति विद–क। १पण्डिते २विदुषि अमरः "समीक्ष्यकारिणं प्राज्ञं धर्म्मकामार्थकोविदम्" मनुः। "आत्मनैव गुणदोषकोविदः"। "श्रौतमार्गसुखगानकोविदेति च" माघः।

**कोविदार** पु० कुं भूमिं विदृणाति–वि+दृ–अण् पृषो०। १रक्तकाञ्चनारे (रक्तकाञ्चन)। अमरः। "कोविदारकलिकाऽतिकोमला तक्रसिद्धतिलतैलपाचिता। हिङ्गुवासकसुवाससवासिता वेसवारलुलिताऽतिलोभदा" पाकशास्त्रम्। काञ्चनारशब्दे गुणाद्युक्तम्। "कशेरु कोविदारश्च तालकन्दस्तथा विषम्"। श्राद्धेदेयकथने वायुपु०। "श्वेतकाञ्चनसदृशः कोविदारः" इति श्राद्धविवेकः। २पारिजाते च। हरिवं० १२६अ० तद्व्युत्पत्तिर्दर्शिता यथा "कोऽप्ययं दारुरित्याङ्करजानन्तोयतोजनाः। कोविदार इति ख्यातस्तत्त्वतः स महातरुः। मन्दारः कोविदारश्च पारिजातस्य नामभिः। स वृक्षो ज्ञायते दिव्यो यस्यैतत् कुसुमोत्तमम्" पारिजातहरणे। "पारिजातान् कोविदारान् देवदारुद्रुमांस्तथा" भा० व० १५५ अ०। अत्र पारिजाताद्भिन्नत्वेन निर्द्देशात् रक्तकाञ्चनपरता स्वार्थे क। रक्तकाञ्चनवृक्षे "अमन्दैः पिचुमर्द्दैश्च मन्दारैः कोविदारकैः" काशी०।

**कोश(ष)** पुंन० अङ्कुरादि कुश(ष)–आधारादौ घञ् कर्त्तरि अच् वा। १अण्डे शब्दर०। कृताकृतयोः २हेमरूप्ययोः अमरः। ३कुड्मले मुकुले ४खड्गपिधाने। (खाप) ५समूहे ६दिव्यभेदे अमरः। मूर्द्धन्यमध्यस्तु अभिधानरूपे ७शब्दपर्य्यायज्ञापकग्रन्थे मेदि० ८धनागारे ९पानपात्रे चषके १०शिम्बायां हेमच०। पनसादिमध्यस्थे (कोया) ख्याते ११पदार्थे धर०। शब्दान्तरपूर्व्वस्तु गोलकाकारे १२पदार्थे यथा "नेत्रकोषः" क्षीरस्वामी। तत्र खड्गपिधाने "वैयाघ्रकोषे निहितो हेमचित्रत्सरुर्म्महान्"। "पृथुरश्चित्रकोशश्च" तस्य हेममये कोषे सुतप्ते पावकप्रभे" भा० वि० ४२अ०। बहुशः प्रयोगः। धनागारे "निःशेषविश्राणितकोषजातम्" मुकुले "मामक्षिणोद्यत्र विभिन्नकोशैः" "भिन्नाद्रिगैरिकतटा इव दन्तकोशाः" रघुः १३त्वगाद्यावरणे कोषवदावरकत्वात् "शरीरकोशाद्यत्तस्याः पार्व्वत्या निःसृताम्बिका। कौशिकीति समाख्याता ततो लोकेषु गीयते" देवीमा०। १४पिधानमात्रे "सुजातयोः पङ्कजकोशयोः श्रियम्" रघुः। "कोशमङ्गुष्ठाङ्गुलिपर्वसु विदध्यात्" सुश्रु० "योवा अयं द्वीपः कुवलयकमलकोषाभ्यन्तरकोशः" भाग० ५।१६।६। कोश(ष)पानदिव्यञ्च वीरमि० दर्शितो यथा "अथ कोश(ष)विधिः। तत्र "अतः परं प्रवक्ष्यामि कोश(ष)स्य विधिमुत्तमम्। शास्त्रविद्भिर्यथा प्रोक्तं सर्वकालाविरोधिनम्। पूर्वाह्णे सोपवासस्य स्नातस्यार्द्रपटस्य च। सशङ्कस्याऽव्यसनिनः कोशपानं विधीयते। इच्छतः श्रद्दधानस्य देवब्राह्मणसन्निधाविति"। सशङ्कस्य असत्येन दिव्यकरणेऽनिष्टशङ्कायुक्तस्य कोशपानम्। उग्रदेवतास्नानोदकपानं देवतास्नानोदकञ्च प्रसृतित्रयं ग्राह्यमित्याह विष्णुः "उग्रान् देवान् समभ्यर्च्य तत्स्नानोदकात्प्रसृतित्रयं पिबेदिदम्मया न कृतमिति व्याहरन् देवताभिमुखः" इति। याज्ञवल्क्योऽपि "देवानुग्रान् समभ्यर्च्य तत्स्नानोदकमाहरेत्। संश्राव्य पाययेत्तस्माज्जलात्तु प्रसृतित्रयमिति"। उग्रान्देवान्दुर्गादित्यादीन्। तेषामन्यतमं देवं प्राड्विवाकः सोपवासो गन्धपुष्पादिभिः सम्पूज्य स्नापयित्वा तत्स्नानोदकं दिव्यदेशन्नयेदित्यर्थः। नीत्वा च तत्र निधाय धर्मावाहनादि शोध्यशिरसि पत्रारोपणान्तं सर्वदिव्यसाधारणविधिं विधाय देवतायतनसमीपे मण्डलञ्च विधाय तत्र शोध्यं प्राङ्मुखं स्थापयित्वा तमसत्येनैतद्दिव्यकरणेऽनिष्टं संश्राव्य जलविधानोक्तेन "तोय! त्वं प्राणिन प्राणः" इत्यादिना मन्त्रेणाभिमन्त्र्य पूर्वनिहितोदकात् प्र·